# bhedabha NgAbhidhAnastotram

# ભેદભઙ્ગાભિધાનસ્તોત્રમ્

## Document Information

Text title : bhedabhangAbhidhAnastotram

File name : bhedabhangAbhidhAnastotram.itx

Category : shiva

Location : doc_shiva

Proofread by : PSA Easwaran

Description-comments : Brihatstotraratnakara 1 newer, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225

Latest update : March 25, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

bhedabha NgAbhidhAnastotram

# ભેદભઙ્ગાભિધાનસ્તોત્રમ્

શ્રીગણેશાય નમઃ ॥

ચતુર્વાહનાભ્યમ્બુજાદ્ભૂતવન્તં ભવન્તં ભવચ્છેદકર્તારમુગ્રમ્ ।
મુખાનાં ચતુષ્કં દધાનં પ્રધાનં શિવં સૃષ્ટિકર્તારમીશાનમીડે ॥ ૧॥

ઉમાઙ્કશ્રિતં સ્વં કરં ચોત્ક્ષિપન્તં ગિરીશોત્તમાઙ્ગસ્થચન્દ્રં દિધીર્ષુમ્ ।
મુહુર્ગર્જિતં સસ્મિતં સર્વપૂજ્યં શિવં વિઘ્નહર્તારમીશાનમીડે ॥ ૨॥

સુમેરોઃ સમન્તાત્સદૈવાશુ યન્તં સહસ્રોસ્રભાસા નભો ભાસયન્તમ્ ।
જગદ્ભદ્રહેતોર્ધૃતાનેકરૂપં શિવં વ્યાધિહર્તારમીશાનમીડે ॥ ૩॥

રમાજાનકીરુક્મિણીજામ્બવત્યાદ્યનેકસ્વશક્તિસ્ફુરદ્વામભાગમ્ ।
હૃષીકેશરામાદ્યશિત્ર્યાદિસંજ્ઞં શિવં સર્વદાતારમીશાનમીડે ॥ ૪॥

ધનાધ્યક્ષરૂપેણ ઋક્થાન્યવન્તં કુબેરાલકેશાદિનામૌઘવન્તમ્ ।
પુલસ્ત્યાન્વયોત્પત્તિભાજં વિરાજં શિવં દ્રવ્યદાતારમીશાનમીડે ॥ ૫॥

પ્રશસ્તારુવિદ્યાનિધાનં સુધાનં સ્વભૂસ્વાપપર્યઙ્કતાં સન્દધાનમ્ ।
અનન્તાવતારચ્છલેનાધિશીર્ષં શિવં ભૂમિધર્તારમીશાનમીડે ॥ ૬॥

અનેકક્રિયારૂપનામપ્રકાશૈર્નિજં દેવતાપઞ્ચકં દર્શયન્તમ્ ।
તથૈવાવતારાન્ દશાન્યાંશ્ચ લોકે નટં વાખિલં દૈવતં જ્યોતિરીડે ॥ ૭॥

શ્રુતેર્નેહ નાનેતિ શબ્દપ્રમાણૈર્મુનિભ્યસ્તદર્થાવયવૈઃ પુરાણૈઃ ।
નિજામેકતાં દ્યોતયન્તાં સુધીભ્યઃ સદાસચ્ચિદાત્માનમીશાનમીડે ॥ ૮॥

અજસ્રેશ્વરારાધને દત્તચેતા મહાત્માચ્યુતાદ્યાશ્રમાન્તઃ પરિવ્રાટ્ ।
અકાર્ષીદિદં ભેદભઙ્ગાભિધાનં મુદે સ્તોત્રમન્તર્ભિદાભઙ્ગભાજામ્ ॥ ૯॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યશ્રીમદચ્યુતાશ્રમવિરચિતં
ભેદભઙ્ગાભિધાનસ્તોત્રં સમાપ્તમ્ ।

Proofread by PSA Easwaran

*bhedabha NgAbhidhAnastotram*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*